गं·स्त·
१

श्रीगणेशायनमः पार्वत्युवाच देवदेव महादेवभक्तानांप्रीतिवर्द्धनः
कानिनामानिप्रोक्तानितेनराणांमहात्मना १ सहस्रनामगंगायाः
स्तोत्रंपरमदुर्लभं वदमेदेवशार्दूलभक्तास्मिसततंप्रिया ईश्वरउवाच
साधुसाधुमहादेविपृष्टंनामाष्टतत्वया गुह्यागुह्यतरंस्तोत्रंप्रवक्ष्या
मिसमासतः ३ यस्यश्रवणमात्रेणानेराधैशिवतांभजेत् यस्माद्दिव
नाम्नैवपूजनात्किंनजायते ४ श्लोकमेकंपठित्वातुगंगायाःशत
योजने गंगास्नानफलंसद्यः प्राप्नुयान्नैवसंशयः ५ सहस्रना १ राम:

मस्तोत्रस्यभगीरथऋषिर्मतः छंदोनुष्टुप्तथाख्यातंगंगावैदेवतामता ६
सर्वतःपापशार्थंपुत्रकामार्थसिद्धये अक्षयस्वर्गकामायविनियोगः प्रकी
र्तित ७ गंगाशरिद्वराविष्णुपादाम्बुजजनिःपरा शिवशेखरसंवासाब्रह्मणःक
लशास्थिता ८ आकाशगामिनीभद्रा वसुगामाप्रवाहिनी ब्रह्मरंध्रसमुद्भू
ताब्रह्मरंध्रनिवासिनी ९ ब्रह्मरंध्रधराधेनुःसर्वकामार्थदायिनी ब्रह्मांड
भेदनपरापरब्रह्मधरापरा १० द्रवरूपधराचैवशिवसंगमदायिनी मुक्ति
दामुक्तिदानेगताशत्रुदवानलालिका ११ अनंगगामीत्रिमूर्तिश्च ब्रह्म

गं·स·
२

णीकमलास्थिता सरस्वतीयसावित्रीजयसेनाजयात्मिका १२ अयमङ्ग
वैश्नवीयविष्ठुक्तिः परमेश्वरी मयीवेदवहन्मायसेदनीवेदनीधरा वेदमू
र्तिस्त्रिमूर्तिश्चदेवमूर्तिदयापरा दाडिमीकामिनीवासाकुलिशाकुलिशप्रि
या १४ कुलिशांगीकुलांगीवकुलनाथकुटंविनी कुलीनासुभगाभा
ग्याभाग्यगम्याहेशोमती १५ कलाकलाधरधराकलाधरशतप्रिया
षोडशीषोडशाराध्याषोडशास्मासरूपिनी १६ षोडशसमासनिलया
षोडांगीकालरूपिणी कालिकामुण्डमालाचकालानांशतनाशिनी १७ राम:
२

कालांगीकालनिलयाकालीकालेश्वरीवरा शेवीमायाशिवारुंडाचंडमु
ण्डविनाशिनी १८ चंडाट्टहासदुर्गम्याचंडानांप्रीतिवर्द्धिनी चंडेश्वरीम
हाग्राताप्रताधीःसिद्धिरूपिनी १९ लक्ष्लाभस्यजननीशातलाभापुरेश्वरी
कौमारीशक्तिकह्रिष्टाक्रौंचदैत्यविनाशिनी २० तारकासुरहंत्रीचमार
कामयगामिनी तारकस्यपराशक्तिस्तारकाणांपतिप्रिया २१ तारकेश
पराशेतस्मातारेशशतरूपिणी नारायणीइयासिंधुसिंधुनगरनिवासि
नी सिंधुश्रेष्ठनामाभार्यासाताशिरासिरूपिणी जलेधरास्यजननीजलेधर

विभूषिणी काममाताचकामधेनीरतिरूपशालप्रिया भीष्ममातामहाभीष्मा
भीष्माणांप्रीतिवर्द्धिनी ज्वालाकालीतुंगेशीतुंगशेखरवासिनी तुंग
श्वरसहायाच वदर्याश्रमवासिनी २५ श्रीक्षेत्रनिलयाचैव ह्यास्याह्यरपा
लिनी जाह्नवीजह्नुतनया नागालयनिवासिनी २६ नागानांजननीचै
वनागानांप्रीतिवर्द्धिनी ज्वालाकालीतुंगेशीतुंगशैलवासिनी ना
गेश्वरसहायाच कैलासनिलयातथा महाप्रभावेरामाश्चवेदमाताविला
सिनी हासंगताचैव हरिपादविनिःसृता अदितिश्चदितिश्चैवकद्रूश्चविनि ३

तातथा सुरसाचाग्निगर्भाचरत्नगर्भाविभावरी शारदीक्षिंडकलानलकू
वरसेविता ३० अरिष्टनेमिदुहिता नक्षत्रगणवासिनी शांतनोर्गृहिणीभ
व्याचसुमाताक्षेशोदरी मत्स्योदरीसुराराध्यासुराणांप्रीतिदायिनी यमुनाचं
ड्भागावशातद्रूश्चयूपथा सरस्वतीश्रुमामोदानंदनाड्डिनिवासिनी नंदप्र
यागनिलयादेवतीर्थनिवासिनी ३३ रुद्राणीरुद्रसावित्रीमहाभैरवनादि
नी भैरवीभीषणाधाम्भ्रगुतुंगनिवासिनी केदारशिखरवासामहालय
निवासिनी तुंगभद्रासुषिणाश्वमाधोऽजयदायिनी भूतभव्यपरासर्वा
नर

सर्वभावान्तरेश्वरी भविष्यज्ञानदा भूतज्ञानदा वर्त्तमानदा शुकस्यजननी
सौम्याव्याससमानाश्रेश्वरी धारापातधराधीरा धैर्यदा शुभदायिनी करुणा
कैकणाश्रयाशुभकंकणदायिनी कंकणैःपातकहा अबलाशत्रुनाशिनी भु
स्मरतांमुक्तिदाभुक्तिरूपानूपविवर्जिता देवानीकोद्भवसेव्यासेवानूपफला
मला कृत्तिकाकृत्तिकावासा कार्त्तिकस्नानदायिनी पुष्करापुष्करावासा
पुष्पप्रचयसुंदरी ४० मुनिसेव्यामुनिर्मेनामानवाकारधारिणी मैनाक
शिखरावासा काशीपुरनिवासिनी महाप्रयागनिलयातीर्थराजप्रसादिनी ४

अक्षयाक्षयरूपा भवसंसारक्षयकारिणी मृगशीर्षा मार्गशीर्षस्नानफल
प्रदा पुष्यनक्षत्ररूपाचपौषेजीवफलप्रदा माघीमाघाप्रुनामाघामाघस्ना
ननिवासिनी श्रीपंचमीप्रियारूपाषष्ठीवारणसंस्थिता अचलानिश्चलाजं
बुजंरूद्वीपसहायिनी भीष्माष्टमीभीष्मगर्भाभीष्मपंचकसेविता एका
दशीद्वादशीवपुरणापुराणसहायिनी पुन्यदापुन्यनिलयापुन्यांगीचारुवा
हिनी ४६ फाल्गुनीफाल्गुनेसेव्याहोलिकागंधरूपिणी उत्ताफानीमहादे
वीसंतुष्टाभस्मधारिणी ७ वसंतर्तुसंसेव्यावसंतोत्सवदायिनी चैत्रीवि
चित्रप्रियाप्रत्यगाणरूपागणेश्वरी ४८ मकरंदस्वरूपावमकरंदनिवासि

५ नी चैत्रशुक्लप्रतिपदा वर्षारंभाकराशुभा माधवी माधवागारा माधवप्रति
दायिनी विशाखे वैशुषापक्षा वैशाखी भानुसप्तमी वैशाखस्नानशुभदा
पिंडारकनिवासिनी तथाक्षयतृतीया च शकुदानशुभप्रदा प्रपादुग्धप्रदा
चैव नित्यस्नानवशीकृता ज्येष्ठा ज्येष्ठस्य महती दशपापप्रणाशिनी ५२
निर्जलारूपिणी चैव तथानंतशयामता आखाढीवारुमवांगी तथाह
रिशयनी स्थिता ५३ श्रावणी श्रवणानंदा सर्वसौभाग्यदायिनी भाद्रभा
द्रपदे सप्ताजन्माजन्माष्टमी तथा ५४ दूर्वाष्टजनसंतुष्टा वीजांकुरनिवा
सिनी ५५ आश्विनेसुतरां सेव्या वितनभक्तिप्रदायिनी नवमीरूपपद्य ५

स्मशुक्लपक्षस्य पूर्णिमा नवरात्रसहाया च कालरात्री महाष्टमी आश्वि
नी भौमवारस्य शतरूपा श्वयानिजा ६० हरसेव्या हरांगी च हरिमंदिरगामि
नी प्रमादो मारसंकल्पा नानारूपा महोदरी ६१ महानंदप्रदा जीवनानाल
कारधारिणी अलंकारप्रिया चैव नानातिथि समाश्रया निर्विगिलधरास्व
च्छा नानाग्रामविहारिणी गंडशैलमहा चैव कामदेवधरावरा सर्वतीर्थम
यी सर्वदेवदानवदर्पिणी काशीप्रातमहानुष्ठप्रवाहाभारनाशिनी भरणी
भारणांगा च तथा तथ्यप्रियासती सती नाम प्रथमंगणा गम्या सर्वमयी प्रभु ६
धी धीरणावती सर्वजनस्य हृदि संस्थिता स्थितिरूपा स्थितिधरा स्थिरांगी

कमलप्रिया कुशाछन्नतथाचैवदूर्वांकुरविराजिता तरंगिणीशैवलिनी तरंगय
तसंकुला महाकच्छपनिलया कच्छपपृष्ठसंस्थिता नानाजंतुधराप्रोक्तानाना
जंतुविनाशिनी वर्षाकालरता सौम्या वातकल्लोलकारिणी नीरस्यवसते
छन्नाधन्यानाशववाहिनी तरंगशतशोभाढ्या तरंगशतमालिनी स्कंनारी
कुचकुंभस्यकुंकुमारुणसुंदरी नानापुष्पोपहाराचसुखसंपत्तिदायिनी मंदा
किनीसरिच्छ्रेष्ठा सर्वदेवविभाहिनी सर्वलोकमयी तद्वातंत्रशास्त्रविनोदि
नी तन्त्रीनंद्यास्थिताविद्या महादेवकुटुंबिनी ७२ सर्वशास्त्रमयीनंदावासवे ६

श्वरपालिनी सचीपुलोमजातुंगाकस्यपस्यप्रियामता स्रष्टिःस्रष्टिरूपाराध्या
प्रलयेकालरूपिणी ७३ द्वादशादित्यसदृशी प्रभावैलोकदीपिका त्रिलोकनि
लयावेद्यावेदरूपाधमर्दिनी ७४ मणिप्रवयसंपन्ना मध्याह्नार्कनिवासि
नी प्रभाताप्रणसर्वांगी सर्वकामप्रदायिनी ७५ प्रातःसंध्यातथाप्रोक्तासंध्याम
ध्याह्निकीमता सायंसंध्यातथारात्रीसंध्यातिमिररूपिणी ७६ निशीथनार
काप्रख्याविद्युद्रूपामहोत्सवा दुःखनाशनिनिर्द्वंद्वीनानादुःखनिवारिणी वि
नोदनीसुफेनाला सागरस्वननिःस्वना गंभीरावर्तसोभाढ्यागंभीरगजगा
मिनी ७८ नानापक्षसमाकीर्णा जलकुक्कुटशोभिता जलजारुणस

गं. वांगीशंखवल्केरवांवरा कुंदस्वेनाकुंदभूषाश्वेतांवरविराजिता राजहंसप
रीवारातटस्थद्रुमशोभिता द्रुमांवराद्रुमाद्रुमावासासर्वद्रुमविहारिणी पद्म
लेखापद्मसेव्यापद्मापद्मजपूजिता लक्ष्मीश्यामावरारोहावरांगीभुव
नेश्वरी ताराश्रीदानदाधन्याहानवानांविनाशिनी ८० छिन्नमस्तावना
क्षत्रायोगिनीयोगिसेविता योगिगम्यायोगधरायोगिप्रीतिविवर्द्धिनी
योगमार्गरतासाध्यासाधकाभीष्टदायिनी सिद्धिदासिद्धसंसेव्यासिद्ध
पूज्यासुरेश्वरी साधकासाधनानुष्ठासाधकानांप्रियंकरी प्रद्युम्नस्पे
वजननीप्रद्युम्नशतसुंदरी प्रद्युम्नांगीस्नुप्रद्युम्नावलभयकरातथा व रामः
७

गं३ रदावबलेव्याववरांगीवरवर्णिनी वनेचरगणाधीशा वनेचरजनप्रिया
वनेचरत्दबाहंत्रीवनेचरमनःप्रिया ८५ सुखदासुखसेव्याशुभा
नांशातंयुता बलभद्रसमाभासाबलभद्रप्रियातथा बलाशुध्याबलावली
बालानांप्रीतिवर्द्धिनी रामारामप्रियासाध्वीसीतारामसुसेविता ७
रमणीयासुरम्यांगीतथाश्रीरमणप्रिया रेवतीरैवतेगम्यातथारैवतवा
सिनी रतिरूपधरासुधुर्नारदीनादेरिता मृदंगशतसंवाद्यामृदंग
शतपूजिता ८८ मृदंगसमनिर्द्धोषामृदंगरवपूजिता पणवापण
वाकारापणवेरितशब्दिका ९० नानावादित्रकुशलावादित्रश

गं-स-
८

भि

नशोभिता मिश्राभिश्रप्रियात्रामिश्रसंपर्कशोभिता संधिःसंधिःस्वरूपाचसंधि
निर्णयदिपिका संधिःस्वरूपकुर्गम्यास्वरसंधिस्थिताप्रिया शाधाश छ्स्वरूपा
चशाब्दशास्त्रप्रमोदिनी शुब्दस्मस्वरूपाचकारकाकारकप्रिया शब्दसं
धिस्वरूपाचतद्धितप्रत्ययापरा धातुवादरताचैवधातूनांसंधिरूपिणी
नैयायिकीतर्कविद्यानदृष्यान्यासुतर्किका चतुप्रमाणगम्याचद्रव्यरू
पागुणेश्वरी कर्मताकर्मनिलयासामान्यासमपूजिता समवायास्थिता
भावरूपासर्वप्रियंकरी पंचविंशतितत्वज्ञामीमांसकरतातथा ९७ मीमां
सशास्त्रेनिरतातथामीमांसकप्रिया मीमांसागम्यरूपाचकर्मब्रह्मप्रपादिता ९८

१

सांख्यासांख्यपरासंख्यासांख्यस्तत्वप्रमोदिनी प्रकृतिःपुरुषाकाराभिन्नाभि
न्नस्वरूपिणी ९९ स्पर्शनीस्पर्शरूपाचस्पर्शाचुम्बकलोहवत पातंजलिध
रागम्यापतंजलिमुनिप्रिया १०० वेदांतिनीवेदगम्यावेदांतप्रतिपादिनी वे
दांतनिलयावेद्यावेदांतिकजनप्रिया १ अद्वैतरूपिणीचैवअद्वैतप्रतिवादि
नी अगम्याकामरूपाचसर्वदेहस्वरूपिणी २ वृथासर्वप्रपंचाचसंसा
रसंकुला संस्रतिर्ग्रामनिरताधर्मनिष्ठापुरांवरा ३ धर्मिष्ठाधर्मनिर
ताधर्मशास्त्रप्रबोधिनि यज्ञियायज्ञविद्याचयज्ञगम्याजनाधिपा अ
श्वमेधादियज्ञानांजननीजातकप्रिया इष्टापूर्तिधरापूर्तिःपूर्णा

णे॰स॰ ९

तिस्वरूपका यज्ञभूमिर्यज्ञदेवी यज्ञानां नाशकारिणी ८ यज्ञवा
हस्थितोयज्ञाहविर्द्धात्रीप्रभंजिनी वाय्वाहाराधासुसेव्याशीतवा
तमनोहरी ९ ललनासरलपूर्वादक्षिणावारुणीतथा कौवेरीचत
थारौद्रीआग्नेयीनैऋती तथा १० मारुतीनंदिनीचैवनंदनारण्य
वासिनी पातालनिलयासौम्याबोधीकुटकुलोद्भवा ११ रा
जनीतिदंडनीतिस्त्रयीवार्त्तापरायणा स्वाहास्वधावषट्कारा
ॐकारसदृशीजरा १२ नारिकेलप्रियाखर्जूरप्रियारोगविनाशिनी
जगदाधाररूपाचचारुणाप्रतिमातथा १३ भद्रकालस्वरूपाचमधु राम॰ ९

कैटभनाशिनी १४ योगमायामहामायानिद्रातंद्राप्रकाशिनी निरा
नंदस्वरूपाचसुधामात्राविधात्मिका निःप्रपंचानिराधाराखडुचर्मधरास
रित् वैनोकचारावसनाश्रलकाचामरावती भोगभोगवतीचैवयमसंयमिनी
रूपा इर्ष्यासूयातथानिंद्रातितिक्षाशांतिरार्जवं दुर्गादुर्गतसादुर्गवासिनी र
वासवप्रिया चंद्राननार्चंडवतीतथात्रिपुरसुंदरी ॐ त्रिपुरात्रिपुरेशानी
त्रिपुरेशी त्रिनेत्रका त्रिपुरध्वंसिनी चिताग्निनिस्त्रिकिनाभगेश्वरी १९ भ
गास्तुभगाराध्याभगपूजनतत्परा सुवासिन्यर्चनप्रीतासुवासासुमनोहरा
१२० सप्तकासामगाराध्याशोभनाशुंभनाशिनी रजोगुणाविनिर्मुक्तानि

मुक्तामुक्तिदायिनी १२१ निष्प्रकासा निराधारा साधारा गुणसंभूता गंभीर
वेदिनी सौरी तपनी तपनप्रिया १२२ अंभोजनी पुरारातिसव्यानुस्वरभिःस्व
राः नादिनी स्तनदानंदी अंबिका अंबकासुरी १२३ त्रिमार्गगा त्रिवलिनी
त्रिजिह्वा त्रितयात्मिका त्रिनन्दा त्रिप्रिया चैव त्रनस्था त्रिमालिनी १२४
त्रिपादिका त्रितंत्रिचतंत्रशास्त्रप्रमोदिनी मंत्रज्ञा मंत्रनिलया मंत्रसा
धनतत्परा १२५ मंत्राणी मंत्रसुभगा मंत्रजाप्यजला भुवि रक्तदंती रक्त
नुराग रक्तबीजविनाशिनी १२६ रक्तांबरधरा रक्ता रक्ताक्षी रक्तवर्जिता
रक्तान्तमारक हरा रक्तस्पृहद्धिदायिनी १२७ हरिता भा हरिद्रा भा हरि 10

द्रांगक्षपूजिता हारिद्रासरससंपूज्या हरिद्रागी हरितस्थिता पीतांबरध
नंता पीतगंधसुवासिनी कर्पूरांगी कर्पूरा च कर्पूरांभः प्रपूजिता कन
काभा स्या मनूपा का मनूपनिवासिनी पीठा पीठसंपूज्या पीठस्था पीठवासि
नी स्वर्णपीठसनापीठा सर्वपीठप्रपूजिता राजराजेश्वरी माला राजराज
धनाधिपा कुबेरगृहगृहसंचश्चयक्षगंधर्वसेविता विद्याधरगणाधी
शा विद्याधरसंपूजिता कुरयक्षविद्यादेवविद्यादैत्यविद्याविदेहका

शुक्रमाताशुक्रसेव्याशुक्रकृच्छुक्रहस्तगतातथा संजीवनीमन्त्रविद्याकच
गाकचसेविता देवयानिचशर्मिष्ठाशर्म्मदाशर्म्मभाविनी सुरासर्पिर्मला
धामाधीमदविह्वललोचना सर्वभक्ष्यासर्वगम्यासर्वस्वर्गप्रदायिनी
छंदोमातापिंगलासीस्तूत्रपिंगलदीपिका वृत्ताष्टताप्रियामंदा
याधानाशतमर्द्दिनी जगती पृथिवीआर्यानुष्टुप्त्रिष्टुवनुष्ठिका
स्रग्धरास्रग्धराचैवमाल्यामाल्यप्रियासुधीः निर्ममानिरहंकारा ११

निर्मोहामोहवर्जिता मोहनाशकराकार्यासर्वकार्य्यकरीमता मोह
नीशकराकोर्यामोहवलयामहावलमसुंदरी सुमेरुशिखरावा
सासुमेरुगृहपूजितासुमेरुमालिनीसुंदरसुमुखीसुमुखप्रिया ४०
वैनायकविघ्नहरीउग्रविघ्नकरीश्वरी मुक्तांवरामुक्तकेशीमु
क्तमातंगगामिनी ज्वालाकरालवदनाज्वलनांगीज्वला
दरी जलपूरितसर्वांगीजालेश्वरप्रपूजिता जलेश्वरजविजीया
जलयाजलशोभिता हंसाहंसाधिपाहंदसेविकाहंसहंसका ४२

ग॰म
१२

त्वचात्वचाविहीनायपल्लुलापल्वलास्थिता मीनामीनसहायाव
मीनध्वजविमर्द्दिनी ४४ वडिशावडिशाकाराधीवराधीवरात्मजा
पारिजातप्रसूनामापारिजातप्रपूजिता पारिजाततटापाराकामधेनु
विहंगमा भेरुंडागरुडागौडीगुडनैवेद्यवासिनी ४६ जात्रमात्रहराजा
ताज्ञानगम्यासुजातिका कान्तिकाकालतनयाकलाषोडशि
कातथा दशमीविजयानामराशौवैजयदायिनी पुष्कुश्रीर्विज
यानामपुष्कुगणनिवासिनी ४८ मासरक्तासनाचंडीप्रचं १२

डाशिवभल्लभा शिवद्वामपुरावंतिकाचिद्द्वारवतीतथा सरित्पति
प्रियाअब्धाब्धागासागरसंगमा प्रद्युम्नपूजिताचंचुश्चंडिकायंडसुंद
रीचंपाचंपकपुष्पाढ्याचंपकाभासुचेल्लिका चंचत्तरंगसंवीता
सर्वब्राह्मणपूजिता ब्राह्मणीब्राह्मणाकाराब्राह्मणोत्थशुभसंहृता य
ज्ञापवितिनीविप्राकुमारीब्रह्मचारिणी वृहस्पतिप्रपूज्याचगुरुर्नाम्नागुरु
तत्परा गुरुप्रीतिर्गुरोर्विद्यागुरुपूजनतत्परा गुर्विलीगुरुगम्याचगया
सुरविनाशिनी पंचकोशीपंचहीनापंचमीपंचसुंदरी पंचेषुपंच

निलयापंचास्यापंचमात्मिका पंचपांडवमाताच कुंतीकुंतीधरा करा तथा
कुंतलेशाभाग्राम्यग्रामथा तथा स्वतंत्रैकधर्मकार्य्यप्पी द्वितीया
कर्मसंस्थिता तृतीयाकरयोगम्यासंप्रदाना चतुर्थिका अपाद
नेपंचमीचतथासंबंधषष्ठिका सप्तम्याधिकरणाख्याविभक्तिपरा तु
रा प्रतिबिंबस्यजननी औषधी वैद्यजीवनी हरीतकीचभंडीच
कणाहंसपदीतथा हंसेनीकुरूतिकुंवागीरार्य्या पद्मभात्मिका
भारत्ती नीनिम्नगा निर्वाना रत्नादिभिरर्चिता रेणुका रेणुतनया 13
रेणोनावानतथा पापराशिहरा मंत्रीतथानीराजशोभिता जयारिक्ता
स्पृषणाचकेदापथगामिनी जन्नजंत्रामरी कंदाकंदमूलफलाशिनी
पितृमातापितृद्रूपा पितृणांस्वर्गदायिनी भगीरथकृपासिंधुभवा
नीभवनाशिनी सागरस्वर्गदाचैवसर्वसागरगामिनी ईश्वरउवाच
नाम्नांसहस्रमाख्यातं गंगायाःसर्वकामदं यस्तुवैपठतेनित्यंमु
क्तिभागीभवेन्नरः पुत्रार्थीलभतेपुत्रं भगीरथसमद्भुतं विद्या

गं·स· र्थीलभतेविद्यांवायस्पतिसमोभवेत आद्वेश्रणोतियोभक्त्यापठतेवैस
१४ माहितः दुर्गताअपिपितरोमुक्तिंगछंत्यनामया तथाहत्याहरायांहि
गंगामध्येस्थितंपुमान् पठतेब्रह्महंदेवितस्यमुक्तिर्नसंशयः १६८
इतिश्रीस्कांधेमहापुराणेकेदारखंडेभगीरथोपाख्यानेगंगावरलोगं
गासहस्रनामस्तोत्रंसमाप्तम् संवत १८६८ श्रावा८पे८ २० १४